श्रीमते रामानुजाय नमः

## श्री देवराजगुरुभिः अनुगृहीता

# ॥ पूर्व दिनचर्या॥

सौम्यजामातृयोगीन्द्र चरणाम्बुज षट्पदम्।
देवराजगुरुं वन्दे दिव्यज्ञान प्रदं शुभम्॥

अङ्के कवेर कन्यायाः तुङ्गे भुवन मङ्गले।
रङ्गे धाम्नि सुखासीनं वन्दे वरवरं मुनिम्॥ १

मयि प्रविशति श्रीमन् मन्दिरं रङ्गशायिनः।
पत्युः पदाम्बुजं द्रष्टुं आयान्तं अविदूरतः॥ २

सुधानिधिं इव स्वैर स्वीकृतो दग्र विग्रहम्।
प्रसन्नार्क प्रतीकाश प्रकाश परिवेष्टितम्॥ ३

पार्श्वतः पाणि पद्माभ्यां परिगृह्य भवत्प्रियौ।
विनयस्यन्तं शनैरङ्घ्री मृदुलौ मेदिनीतले॥ ४

आम्लान कोमलाकारं आताम्र विमलाम्बरम्।
आपीन विपुलोरस्कं आजानुभुज भूषणम्॥ ५

मृणाल तन्तुसन्तान संस्थन धवलत्विषा।
शोभितं यज्ञसूत्रेण नाभि बिम्ब सनाभिना॥ ६

अम्भोज बीज मालाभिः अभिजात भुजान्तरम्।
ऊर्ध्व पुण्ड्रैः उपश्लिष्टं उचित स्थान लक्षणैः॥ ७

श्रीमते रामानुजाय नमः

काश्मीर केसरस्तोम कडारस्निग्धरोचिषा।
कौशेयेन समिन्धनं स्कन्धमूल अवलम्बिना॥ ८

मन्त्र रत्न अनुसन्धान सन्तत स्फुरिताधरम्।
तदर्थ तत्व निद्यान सन्नद्ध पुलकोद्गमम्॥ ९

स्मयमान मुखाम्भोजं दयमान दृगञ्चलम्।
मयि प्रसाद् प्रवणं मधुरोदार भाषणम्॥ १०

आथ्मलाभात् परं किञ्चित् अन्यन्नास्ति इति निश्चयात्।
अङ्गिकर्थुं इव प्राप्थं अकिञ्चनं इमं जनम्॥ ११

भवन्तमेव नीरन्ध्रं पश्यन् वश्येन चेतसा।
मुने! वरवर! स्वामिन् मुहुः त्वां एव कीर्तयन्॥ १२

त्वदन्य विषय स्पर्श विमुखैः अखिलेन्द्रियैः।
भवेयं भव दुःखानां असह्यानां अनास्पदम्॥ १३

परेधुः पश्चिमे यामे यामिन्याः समुपस्थिते।
प्रबुध्य शरणं गत्वा परां गुरुपरम्पराम्॥ १४

ध्यात्वा रहस्य त्रितयं तत्व याथात्म्य दर्पणम्।
पर व्यूहादिकान् पत्युः प्रकारान् प्रणिधाय च॥ १५

ततः प्रथ्युषसि स्नात्वा कृत्व पौर्वाह्णिकीः क्रियाः।
यतीन्द्र चरण द्वन्द प्रवणेनैव चेतसा॥ १६

श्रीमते रामानुजाय नमः

अथ रङ्ग निधिं सम्यक् अभिगम्य निजं प्रभुम्।
श्रीनिधानं शनैः तस्य शोधयित्वा पदद्वयम् ॥ १७

ततः तत् सन्निधि स्तम्भ मूल भूतल भूषणम्।
प्राङ्मुखं सुखं आसीनं प्रसाद मधुरस्मिथम्॥ १८

बृत्यैः प्रिय हिथैक अग्रैः प्रेम पूर्वं उपासितम्।
तत् प्रार्थना अनुसारेण संस्कारान् संविधाय मे॥ १९

अनुकम्पा परीवाहैः अभिषेचन पूर्वकम्।
दिव्यं पदद्वयं दत्त्वा दीर्घं प्रणामतो मम॥ २०

साक्षात् फलैक लक्ष्यत्व प्रतिपत्ति पवित्रितम्।
मन्त्र रत्नं प्रयच्छन्तं वन्दे वरवरं मुनिम्॥ २१

ततः सार्धं विनिर्गत्य भृत्यैः नित्यानपायिभिः।
श्रीरङ्ग मङ्गलं द्रश्टुं पुरुषं भुजगेशयम्॥ २२

महति श्रीमति द्वारे गोपुरं चतुराननम्।
प्रणिपत्य शनैरन्तः प्रविशन्तं भजामि तम्॥ २३

देवी गोदा यतिपति शटद्वेशिणौ रङ्गश्रुङ्गं
सेनानाथो विहग वृषभः श्रीनिधिः सिन्धुकन्या।
भू मा नीळा गुरुजनवृतः पुरुषः चेत्यमीशां
अग्रे नित्यं वरवरमुनेः अङ्घ्रियुग्मं प्रपध्ये॥ २४

मङ्गलाशासनं कृत्वा तत्र तत्र यथोचिथम्।

धाम्नः तस्मात् विनिष्क्रम्य प्रविश्य स्वं निकेतनम्॥ २५

अथ श्रीशैलनाथार्य नाम्नि श्रीमति मण्डपे।
तदङ्घ्रि पङ्कज द्वन्द्वः चाया मद्य निवासिनाम्॥ २६

तत्वं दिव्यप्रबन्धानां सारं सम्सार वैरिणाम्।
सरसं सरहस्यानां व्याचक्षाणं नमामि तम्॥ २७

ततः स्वचरणाम्भोज स्पर्श सम्पन्न सौरभैः।
पावनैः अर्थिनस्तीर्थैः भावयन्थं भजामि तम्॥ २८

आराध्य श्रीनिधिं पश्चात् अनुयागं विधाय च।
प्रसादपात्रं मां कृत्वा पश्यन्तं भावयामि तम् ॥ २९

ततः चेथः समाधाय पुरुषे पुष्करेक्षणे।
उत्तंसित कर द्वन्द्वं उपविष्टं उपह्वरे॥ ३०

अब्जासनस्थं अवदात सुजात मूर्थिं
आमीलिथाक्षं अनुसंहित मन्त्र रत्नम्।
आनम्रमौलिभिः उपासितं अन्तरङ्गैः नित्यं मुनिं
वरवरं निभृतो भजामि॥ ३१

ततः शुभाश्रये तस्मिन् निमग्नं निभृतं मनः।
यतीन्द्र प्रवणं कर्तुं यतमानं नमामि तम्॥ ३२

**॥ इति पूर्व दिनचर्या समाप्ता॥**